योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ६२

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

अथैवंप्रायया तत्र विश्रम्भकथया चिरम् ।

प्राक्तनस्नेहगर्भिण्या स्थित्वोवाचायुधाभिधः ।। २

परिघ उवाच ।

यद्यत्संसारजालेऽस्मिन्क्रियते कर्म भूमिप ।

तत्समाहितचित्तस्य सुखायान्यस्य नानघ ।। २

कच्चित्संकल्परहितं परं विश्रमणास्पदम् ।

परमोपशमं श्रेयः समाधिमनुतिष्ठसि ।। ३

सुरघुरुवाच ।

एतन्मे ब्रूहि भगवन्सर्वसंकल्पवर्जितम् ।

परमोपशमं श्रेयः समाधिर्हि किमुच्यते ।। ४

यो ज्ञो महात्मन्सततं तिष्ठन्त्यवहरंश्च वा ।

असमाहितचित्तोऽसौ कदा भवति कः किल ।। ५

नित्यं प्रबुद्धचित्तास्तु कुर्वन्तोऽपि जगत्क्रियाः ।

आत्मैकतत्त्वसंनिष्ठाः सदैव सुसमाधयः ।। ६

बद्धपद्मासनस्यापि कृतब्रह्माञ्जलेरपि ।

अविश्रान्तस्वभावस्य कः समाधिः कथं च वा ।। ७

तत्त्वावबोधो भगवन्सर्वाशातृणपावकः ।

प्रोक्तः समाधिशब्देन नतु तूष्णीमवस्थितिः ।। ८

समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनी ।

साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः ।। ९

अक्षुब्धा निरहंकारा द्वन्द्वेष्वननुपातिनी । '

प्रोक्ता समाधिशब्देन मेरोः स्थिरतराकृतिः ।। १०

निश्चिन्ताधिगताभीष्टा हेयोपादेयवर्जिता ।

प्रोक्ता समाधिशब्देन परिपूर्णा मनोगतिः ।। ११

यतःप्रभृति बोधेन युक्तमात्यन्तिकं मनः ।

तदारभ्य समाधानमव्युच्छिन्नं महात्मनः ।। १२

नहि प्रबुद्धमनसो भूत्वा विच्छिद्यते पुनः ।

समाधिर्दूरमाकृष्टो बिसतन्तुः शिशोरिव ।। १३

समग्रं दिनमालोकाद्विरमत्यक्षयो यथा ।

आजीवितान्तं नो प्रज्ञा तथा तत्त्वावलोकनात् ।। १४

अजस्रमम्बुवहनाद्यथा नद्या न रुद्ध्यते ।

तथा विज्ञानदृग्बोधात्क्षणमात्रं न रुद्ध्यते ।। १५

न विस्मरत्यविरतं यथा कालः कलागतिम् ।

न विस्मरत्यविरतं स्वात्मानं प्राज्ञधीस्तथा ।। १६

न विस्मरति सर्वत्र यथा सततगो गतिम् ।

न विस्मरति निश्चेयं चिन्मात्रं प्राज्ञ धीस्तथा ।। १७

गतिं कालकला यद्वच्चिन्वाना समवस्थिता ।

चिच्चितिश्चेत्यरहिता चिन्वाना गतयस्तथा ।। १८

यथा सत्ताविहीनात्मा पदार्थो नोपलभ्यते ।

तथात्मज्ञानहीनात्मा कालो ज्ञस्य न लभ्यते ।। १९

न संभवति संसारे गुणहीनो गुणी यथा ।

न संभवत्यात्मसंविद्वर्जितो ह्यात्मवांस्तथा ।। २०

सर्वदैवास्मि संबुद्धः सर्वदैवास्मि निर्मलः ।

सर्वदैवास्मि शान्तात्मा सर्वदास्मि समाहितः ।। २१

भेदः केन समाधेर्मे जन्यते कथमेव वा ।

आत्मनोऽव्यतिरेकेण नित्यमेव सदात्मता ।। २२

तस्मात्कदाचिदपि मे नासमाधिमयं मनः ।

न वा समाहितं नित्यमात्मतत्त्वैकसंभवात् ।। २३

सर्वगः सर्वदैवात्मा सर्वमेव च सर्वथा ।

असमाधिर्हि कोऽसौ स्यात्समाधिरपि कः स्मृतः २४

नित्यं समाहितधियः सुसमा महान्तस्तिष्ठन्ति कार्यपरिणामविभागमुक्ताः ।

तेनासमाहितसमाहितभेदभङ्ग्या नित्योदितः क्व नु स उत्तमवाक्प्रपञ्चः २५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे समाधिनिश्चयो नाम द्विषष्टितमः सर्गः ।।

६२ ।।